१९.१२.२०

उपशास्त्री प्रथम वर्ष, विषय व्याकरण

ग्रन्थ सिद्धान्तकौमुदी तद्धितेषु अपत्याधिकारः

1 पौत्रः – पुत्रस्यापत्यम् इति विग्रहे अनृष्यानन्तर्ये बिदादिभ्योऽञ् इति सूत्रेण अञ् प्रत्यये अनुबन्ध लोपे। जित्वात् तद्धितेष्वचामादेः इति वृद्धौ, अमाल्लोपे। प्रातिपदिक संज्ञायां विभक्तिकार्ये।

2 शैवः – शिवस्यापत्यम् इति विग्रहे शिवादिभ्योऽण् इति सूत्रेण अण् प्रत्यये अनुबन्ध लोपे। तद्धितेष्वचामादेः इति सूत्रेण वृद्धौ, अमाल्लोपे। प्रातिपदिक संज्ञायाम् विभक्तिकार्ये।

2 गाङ्गः – गंगायाः अपत्यम् इति विग्रहे शिवादिभ्योऽण् इति सूत्रेण अण् प्रत्यये अनुबन्ध लोपे। तद्धितेष्वचामादेः इति वृद्धौ, अमाल्लोपे। प्रातिपदिक संज्ञायाम् विभक्तिकार्ये।

3 वासुदेवः – वसुदेवस्यापत्यम् इति विग्रहे ऋष्यन्धक वृष्णिकुरुभ्यश्च इति सूत्रेण अण् प्रत्यये अनुबन्ध लोपे तद्धितेष्वचामादेः इति सूत्रेण वृद्धौ। प्रातिपदिक संज्ञायां विभक्तिकार्ये।

4 वासिष्ठः, वैश्वामित्रः – वसिष्ठस्य विश्वामित्रस्य च ऋषेः अपत्यम् इति विग्रहे ऋष्यन्धक वृष्णिकुरुभ्यश्च इति सूत्रेण अण् प्रत्यये अनुबन्ध लोपे। तद्धितेष्वचामादेः इति वृद्धौ, अल्ल अमाल्लोपे। विभक्तिकार्ये।

5 द्वैमातुरः – द्वयोर्मात्रोरपत्यम् इति विग्रहे मातुरुत् संख्यासंभद्रपूर्वायाः इति सूत्रे ऋकारस्य स्थाने उत्वं तथा अण् प्रत्यये अनुबन्ध लोपे। तद्धितेष्वचामादेः इति वृद्धौ प्रातिपदिक संज्ञायां विभक्तिकार्ये।

अमलापमिश्र
उ० शा० प्र० व्याकरण
१०८ उ० श्री० ग० वि०
सुलभेना पूर्णिया

दिनांक 11-9-21

उपशास्त्री प्रथम वर्ष, विषय व्याकरण
ग्रन्थ- सिद्धान्त कौमुदी, अजन्त स्त्रीलिङ्ग प्रकरण (072)

1 मत्याम् - मति शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण ङिविभक्तौ अनुबन्ध लोपे। ङिति ह्रस्वश्च इति वा नदी संज्ञायाम्, इदुद्भ्याम् इति सूत्रेण ~~ङेरौत अनुबन्ध लोपे~~ ङे राम्, इकोयणचि इति सूत्रेण यणो मत्याम् इति सिद्धम्।

2 मतौ - नदीसंज्ञाभिवेके पक्षे शेषोघ्यसखि इति सूत्रेण घिसंज्ञायाम्, घित्वात् अच्च घेः इति ङेरौत इकारस्थाने अकारादेशे मतौ इति सिद्धम्।

3 तिस्रः - त्रि शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस इति सूत्रेण बहुषु बहुवचनम् इति सूत्र सहकारेण त्रि शब्दात् जस विभक्तौ अनुबन्ध लोपे। त्रि चतुरोः स्त्रियां तिसृ चतसृ इति सूत्रेण त्रि स्थाने तिसृ आदेशे अनुबन्ध लोपे तिसृ अस इति दशायां ऋतोङिसर्वनामस्थानयोः इति सूत्रेण गुणे प्राप्ते तद्बाधित्वा अचि र ऋतः इति सूत्रेण ऋकारस्य स्थाने रेफादेशे, सकारस्य रुत्वे विसर्गे।

4 तिसृणाम् - त्रि शब्दात् अर्थवदिति प्रातिपदिक संज्ञायां स्वौजस् इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्र सहकारेण आम् विभक्तौ। त्रि चतुरोः स्त्रियां तिसृ चतसृ इति सूत्रेण त्रि स्थाने तिसृ आदेशे तिसृ आम् इति जाते। ह्रस्वनद्यापो नुट् इति सूत्रेण नुडागमे अनुबन्ध लोपे नामि इति सूत्रेण दीर्घे प्राप्ते न तिसृ चतसृ इति निषेधे अट्कुप्वाङ्नुम् व्यवायेऽपि इति णत्वे तिसृणाम् इति सिद्धम्।

अमरनाथ मिश्र
एसो॰ प्रो॰ व्याकरण
रा॰ उ॰ सं॰ म॰ वि॰
सुल्तानपुरीया

दिनांक 11-9-20 उपशास्त्री द्वितीयवर्ष, विषय-व्याकरण
लघु-सिद्धान्त कौमुदी, अदादि प्रकरणम्

1 शेरते — शीङ् धातोर्लट्, लटः स्थाने तिप्तस्झि इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्रसहायेन शीङ् धातोः झि प्रत्ययः। तिङ्शित् सार्वधातुकम् इति सार्वधातुक संज्ञायां कर्तरि शप् इति शप् प्रत्यये अदिप्रभृतिभ्यः शपः इति शपो लुक्। झोऽन्तः इति सूत्रेण झकारस्य स्थाने अन्तादेशः। शीङः सार्वधातुके गुणः इति गुणे, टित आत्मनेपदानां टेरे इति सूत्रेण टेरेत्वे संयोगान्तलोपे शीङो रुट् इति सूत्रेण रुडागमे शेरते इति सिद्धम्।

2 अधीते — अधि पूर्वक इङ् धातोर्लट्, लटः स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये, तिङ्शित् सार्वधातुकम् इति सार्वधातुक संज्ञायां, कर्तरि शप् इति शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्, टित आत्मनेपदानां टेरे इति एत्वे, सवर्ण दीर्घे अधीते इति सिद्धम्।

3 अधीयाते — अधि पूर्वक इङ् धातोर्लट्, लटः स्थाने तिप्तस्झि इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्रबलात् इङ् धातोः आताम् प्रत्यये। सार्वधातुक संज्ञायां, शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्, आतो ङितः इति सूत्रेण आकारस्य स्थाने इयादेशे, टित आत्मनेपदानां टेरे इति एत्वे सवर्णदीर्घे अधीयाते इति सिद्धम्।

5 अधिजगे — इङ् धातोर्लिट्, लिट्स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये। गाङ् लिटि इति इङः स्थाने गाङादेशे लिटि धातोरनभ्यासस्य इति द्वित्वे अभ्यासकार्ये ह्रस्वे अधि ग गा त इति स्थिते कुहोश्चुः इति चुत्वे। लिटस्तझयोरेशिरेच् इति एशादेशे आतो लोप इटि च इति आकारलोपे अधिजगे इति सिद्धम्।

अमरनाथ मिश्र
एसो॰ प्रो॰ व्याकरण
रा॰उ॰ सं॰ महावि॰
सुल्तानपुर शाखा